# चतुर्दश रागमालिका

## श्री मुत्तुस्वामि दीक्षित विरचिता

## ताळम्ः आदि

### पल्लवि

### श्री रागः

श्री विश्वनाथं भजेऽहं चतुर्दशभुवनरूप-
रागमालिकाभरणधरणान्तःकरणम्

### चरणानि

### अरभि रागः

श्रितजनसंसारभीत्यापहं आध्यात्मिकादि-
तापत्रय मनोभीत्यापहम्

### गौरि रागः

श्री विशालाक्षीगौरीशं सकलनिष्कळ रूप-
सच्चिदानन्दमयगौरीशम्

### नाट रागः

चित्रविश्वनाटकप्रकाशं जगत्प्रकाशक
भास्करशशाङ्ककोटिकोटिप्रकाशम्

### गौळ रागः

गोविन्दादिविनुत गौळाङ्गं क्षीरकुन्देन्दुकर्पूरादि
विजयभसितोद्धूळितगौळाङ्गम्

### मोहन रागः

गुरुगुहसंमोहनकरलिङ्गं पञ्चीकृतपञ्चमहाभूत-

प्रपञ्चादिमोहनकरलिङ्गम्

## विलोमम्

## मोहन रागः

विरिञ्चिविष्णुरुद्रमूर्तिमयं

## गौळ रागः

विषयपञ्चकरहितमभयं

## नाट रागः

निरतिशयसुखदनिपुणतरं

## गौरि रागः

निगमसारमीश्वरममरं

## अरभि रागः

स्मरहरं परमशिवमतुलं

## श्री रागः

सरससदयहृदयनिलयमनिशम्
श्री विश्वनाथं भजेऽहम्

## साम रागः

सदाशिवं सामगानविनुतं प्रकृत्यादिसप्तरूप-
सामगानविनुतम्

## ललित रागः

सन्मात्रं ललितहृदयविदितं कामक्रोधादिरहित-
ललितहृदयविदितम्

## भैरव रागः

चिदाकाशभैरवं पुरहरं विधिकपाल-
त्रिशूलधरभैरवं पुरहरम्

## सारङ्ग रागः

चित्सभेश्वरं सारङ्गधरं दारुकावनतपोधन-
कल्पितसारङ्गधरम्

## शङ्कराभरण रागः

सदाश्रयामि शङ्कराभरणं चिन्तितार्थवितरण-
धुरीणतरमाणिक्यमयशङ्कराभरणम्

## काम्भोजि रागः

सद्गतिदायकाम्भोजचरणं धर्मार्थादिनिखिल-
पुरुषार्थप्रदसमर्थतराम्भोजचरणम्

## देवक्रिय रागः

वदान्यदेवक्रियाखेलनं सृष्टिस्थितिविलय-
तिरोधानानुग्रहकारणक्रियाखेलनम्

## भूपाळ रागः

वैद्यलिङ्गभूपालपालनं श्रीपुरनिरृतिभाग-
गर्ततीरस्थिरतरभूपालपालनम्

## विलोमम्

## भूपाळ रागः

गुरुगणेशसुरनरेशमनिशं

## देवक्रिय रागः

कुजबुधादिग्रहगतिविहितं

## काम्भोजि रागः

वरदमनलरविशशिनयनं

शङ्कराभरण रागः

वनजचन्द्रसन्निभवदनं

सारङ्ग रागः

परमहंसानन्दनर्तनं

भैरव रागः

पतितपावनकरणमघहरणं

ललिता रागः

परतरं परममनोलयजयं

साम रागः

परादिवाक्प्रकाशानन्दमयं

मोहन रागः

विरिञ्चिविष्णुरुद्रमूर्तिमयं

गौळ रागः

विषयपञ्चकरहितमभयं

नाट रागः

निरतिशयसुखदनिपुणतरं

गौरि रागः

निगमसारमीश्वरममरं

आरभि रागः

स्मरहरं परमशिवमतुलं

श्री रागः

सरससदयहृदयनिलयमनिशम्

श्री विश्वनाथं भजेऽहम्

✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠